संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - १
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

# याज्ञिक्युपनिषत्

(महानारायणोपनिषत्)

## विज्ञानेश्वरप्रणीतविवरणसहिता

सम्पादकः
सूर्यनारायणनागेन्द्रभट्टः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# आमुखम्

अथ विदितचरमेवैतत् समेषां यत् युगाब्दः ५१०१ (१९९९-२०००) तमो वर्षः संस्कृतवर्षः इति भारतशासनेन समुद्घोषितः आसीत्। तदनुसारं भारतशासनेन मानवसंसाधनविकासमन्त्रालयेन, राष्ट्रियसंस्कृतसंस्थानेन अन्याभिश्च विविधाभिः संस्थाभिः राष्ट्रेऽस्मिन् कोणे कोणे बहवः बहुविधाश्च कार्यक्रमाः आयोजिताः अनुष्ठिता आसन्। ऐतिहासिकेन एतेन संस्कृतवर्षसमुद्घोषणेन संस्कृतज्ञानां संस्कृतप्रेमिणां संस्कृतबन्धूनां सामान्यजनानां च हृदयेषु यथोचितं संस्कृतविषयकं पुनर्जागरणं समुदभूत्। समग्रोऽपि राष्ट्रपरिवारः संस्कृतविषयकैः भावनाप्रचयैः सम्पूरितः समुत्तेजितश्च आसीत्। ऐतिहासिकीम् आनन्दसन्दोहदां तामिमां संस्कृतवर्षस्मृतिं चिरस्मरणीयां विधातुं संस्कृतवर्षस्मृतिग्रन्थमाला इति नाम्ना त्रिशतस्य ग्रन्थानां प्रकाशनपर्यवसाना काचित् महत्त्वशालिनी योजना राष्ट्रियसंस्कृतसंस्थानेन स्वीकृता। योजनायामस्याम् अद्य यावत् अप्रकाशितानां शतस्य पाण्डुलिपिग्रन्थानां प्रकाशनम्, विविधासु भाषासु विरचितानां नैकशास्त्रसम्बद्धानाम् अभिनवानां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनम्, प्रान्तभाषासु प्रसिद्धानां विविधवाङ्मयप्रक्रियारूपाणां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनं च सङ्कल्पितं वर्तते। तेष्वाद्यम् अप्रकाशित-हस्तलिखित-ग्रन्थप्रकाशनात्मकं सङ्कल्पं पुरस्कृत्य प्रकाशित एषः **याज्ञिक्युपनिषद्विवरणात्मकः** ग्रन्थः भवत्करकमलमलङ्करोति।

याज्ञिक्युपनिषदिति श्रीमन्महानारायणोपनिषद एवापरमभिधानम्। नारायणप्रश्न इत्यपि व्यवह्रियमाणा उपनिषदियं महानारायणोपनिषन्नाम्ना वैदिकसमुदाये सुपरिचिता वर्तते। महानारायणोपनिषत् तावत् तैत्तिरीयारण्यकस्य दशमः प्रपाठकः। अस्या उपनिषदः याज्ञिक्युपनिषदित्यभिधानस्य औचित्यमित्थं विवृणोति विज्ञानेश्वरः– "*तत्रोपनिषदस्त्रिविधाः। सांहितिक्यो वारुण्यो याज्ञिक्यश्च। तत्र सांहितिक्यो वारुण्यश्च गताः। तत्र वारुण्युपनिषत्सु ब्रह्मविदाप्नोति परमित्यारभ्य केवलं ब्रह्मात्मैकत्वज्ञानमुपदिष्टम्। इदानीं ससंन्यासं तदेव ज्ञानं प्रतिपादयितुं याज्ञिक्यः प्रवर्तन्ते। नारायणाख्योऽयं समस्तः प्रश्नो याज्ञिक्य उपनिषद उच्यन्ते। यज्ञात्मना भगवता नारायणेन दृष्टत्वात्।*" इति।

वेदभाष्यकारौ भट्टभास्करसायणाचार्यौ उपनिषदमेनां तैत्तिरीयारण्यकस्य खिलभाग इति मन्वाते स्म। खिलभागः किल परिशिष्टभागः। अत्र हि धार्मिककर्मणाम् उपासनानां च सम्बद्धाः विषयाः, अद्वितीय-परमतत्त्वं ब्रह्म अधिकृत्य च कृताः अनेके विचाराः बहुभिः प्रकारैरुपवर्णिताः। प्रथमे हि अनुवाके अम्भस्यपार इत्यादिना आरब्धे परमेश्वरस्य निखिल-जगदुत्पत्तिहेतुत्वादिकम् उक्तम्। अस्मिन्नेवानुवाके षड्भिर्गायत्रीभिः परमात्मप्राप्तिद्वारभूत-देवताविशेषप्रार्थना प्रस्तुता वर्तते। हिरण्यगर्भसूक्तम् अघमर्षणसूक्तं चात्रैव अस्ति। वरुणमधि कृत्य प्रोक्ते अघमर्षणसूक्ते तावत् तीर्थस्नानोपयोगिमन्त्रा वर्तन्ते। मनोवाक्कर्मभिः जातपापानां निवारणार्थं क्रियमाणा प्रार्थना च अत्र दृश्यते। जातवेदस इत्यादि-दुर्गासूक्तमन्त्रेषु ज्ञातव्यं तत्त्वं प्रत्यपादि, मायाख्योपाधिप्राधान्यम् आश्रित्य तत्स्वरूपं च प्रोक्तम्। द्वितीयाद्यष्टमानुवाकान्तं यावत् महाव्याहृतिहोममन्त्राः, परब्रह्मणो महाव्याहृतिप्रतिपाद्यत्वम्, सम्यग्ज्ञानार्थं पापक्षयादिप्रार्थना, कर्मणाम् अवरतपस्त्वम्, सर्वकर्मपरित्यागेन ब्रह्मसंस्थतायाः परमतपस्त्वं च प्रतिपादितम्। नवमेऽनुवाके पुण्यापुण्ययोः स्तुतिनिन्दे प्रदर्शिते, अणोरणीयानित्यादिना मुमुक्षोर्मोक्षसिद्ध्यर्थं

दीप्तिमत् लोकेऽन्यदपि दीप्तिमत् तद् ब्रह्मैव। अमृतम्। अत्रैव[1]शब्दोऽध्याहर्तव्यः। [2]तदमृतं देवानां जीवनहेतुभूतममृतमपि तद् ब्रह्मैव।

अथवा - तदेव शुक्रममृतं शुक्रं शोचिष्ठं तदेवामृतममरणधर्मकं नित्यं यत्तदपि तत् पूर्वोक्तं परब्रह्मैव। तद् ब्रह्म सर्वान्तःकरणाधिष्ठाता हिरण्यगर्भोऽपि तद् ब्रह्मैव। तदापः सर्वजिह्वेन्द्रियसमष्ट्यभिमानिनी जिह्वेन्द्रियाधिष्ठात्र्यब्देवतापि तद् ब्रह्मैव। स प्रजापतिः तत् प्रजापतिः। तृतीयलिङ्गस्थाने पुल्लिङ्गनिर्देशः। सर्वस्थूलसमष्ट्यभि[3]मानी स्थूलाधि[4]ष्ठाता विराडाख्यः प्रजापतिरपि तद् ब्रह्मैव। एवकारापिशब्दयोः प्रदर्शितप्रकारेणान्वयो द्रष्टव्यः। [5]अग्न्यादिसमष्टिदेवताग्रहणमितरेन्द्रियसमष्टिदेवतानामुपलक्षणं द्रष्टव्यम्। एवकारानुबन्धार्थो विधेय इति हि न्यायः। तदेवाग्निरित्येवानुसारेण सर्ववेदान्तप्रतिपाद्यैकविज्ञानेन सर्वविज्ञानसिद्ध्यर्थमेवम् [6]अयूयुजम्।

अथवा - तदेव [7]ब्रह्माग्निर्भूत्वा हविर्वहनादिना जगत उपकरोति। तदेव वायु भावेन विहरणप्रेरणादि(ना) [8]जगद्यन्त्रं प्रवर्तयति। तदेव सूर्यात्मकं सत् [9]तुष्टिप्रकाशादिना जगद्धारयति। तदेव चन्द्रमा भूत्वा ओषधिवनस्पत्यादिवृद्ध्या प्राणिनो जीवयति। तदेव शुक्रं रेतोभावेन परिणतं सत् अमृतत्वहेतुप्रजाभावेन सञ्जायते। यथाप्रजमनुप्रजायसे तदु मर्त्यामृतमिति। तदेव ब्रह्मा हिरण्यगर्भो भूत्वा सर्वान् प्राणिनो धत्ते। तदेवापः [10]आपो भूत्वा सस्यादिनिष्पत्तिद्वारेण प्राणिनः प्राणयति। तदेव प्रजापतिर्भूत्वा प्रजानां [11]पतिर्भवति।

## (कालोत्पत्त्यादि)

सर्वकर्मतत्फलादीनां [12]प्रापकस्य लवादिपरार्धान्तकालस्य सांविद्रूपात् पुरुषादुत्पत्तिं [13]सर्वेषां मन्वादीनां पुरुषव्यतिरेकेणाभावं पुरुषस्याद्वितीयत्वं चाह सर्वे निमेषा इत्यारभ्य महद्यश इत्यन्तेन -

---

१.शतछब्दो २.तदामृतं २.मानिनी
४.स्थाताविराजाख्यः: ५.अत्र पञ्चमपत्रे ना०उ०भा०, श्रीरामः इति दृश्यते।
६.अमयायुजम् ७.ब्रह्मादि ८.जगद्यंतं ९.स्तुष्टि
१०.अपो ११.पातु १२.पापकस्य १३.सर्वेष









**Rashtriya Sanskrit Sansthan**

56-57, Institutional Area, Janakpuri,
New Delhi 110 058